# .. lalitA stavarAjaH from brahmANDamahApurANa ..

# ॥ લલિતા સ્તવરાજઃ બ્રહ્માણ્ડમહાપુરાણે ॥

## Document Information

Text title : lalitAstavarAjaH brahmANDapurANe
File name : lalitAstavarAjabrahmANDa.itx
Category : stavarAja
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : PSA Easwaran psaeaswaran at gmail.com
Proofread by : PSA Easwaran psaeaswaran at gmail.com
Latest update : December 14, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ લલિતા સ્તવરાજઃ બ્રહ્માણ્ડમહાપુરાણે ॥

દેવા ઊચુઃ
જય દેવિ જગન્માતર્જય દેવિ પરાત્પરે ।
જય કલ્યાણનિલયે જય કામકલાત્મિકે ॥ ૩.૧૩.૧॥

જયકારિ ચ વામાક્ષિ જય કામાક્ષિ સુન્દરિ ।
જયાખિલસુરારાધ્યે જય કામેશિ માનદે ॥ ૩.૧૩.૨॥

જય બ્રહ્મમયે દેવિ બ્રહ્માત્મકરસાત્મિકે ।
જય નારાયણિ પરે નન્દિતાશેષવિષ્ટપે ॥ ૩.૧૩.૩॥

જય શ્રીકણ્ઠદયિતે જય શ્રીલલિતેઽમ્બિકે ।
જય શ્રીવિજયે દેવિ વિજયશ્રીસમૃદ્ધિદે ॥ ૩.૧૩.૪॥

જાતસ્ય જાયમાનસ્ય ઇષ્ટાપૂર્તસ્ય હેતવે ।
નમસ્તસ્યૈ ત્રિજગતાં પાલયિત્ર્યૈ પરાત્પરે ॥ ૩.૧૩.૫॥

કલામુહૂર્તકાષ્ઠાહર્માસર્તુશરદાત્મને ।
નમઃ સહસ્રશીર્ષાયૈ સહસ્રમુખલોચને ॥ ૩.૧૩.૬॥

નમઃ સહસ્રહસ્તાબ્જપાદપઙ્કજશોભિતે ।
અણોરણુતરે દેવિ મહતોઽપિ મહીયસિ ॥ ૩.૧૩.૭॥

પરાત્પરતરે માતસ્તેજસ્તેજીયસામપિ ।
અતલં તુ ભવેત્પાદૌ વિતલં જાનુની તવ ॥ ૩.૧૩.૮॥

રસાતલં કટીદેશઃ કુક્ષિસ્તે ધરણી ભવેત્ ।
હૃદયં તુ ભુવર્લોકઃ સ્વસ્તે મુખમુદાહૃતમ્ ॥ ૩.૧૩.૯॥

દૃશશ્ચન્દ્રાર્કદહના દિશસ્તે બાહવોઽમ્બિકે ।
મરુતસ્તુ તવોચ્છ્વાસા વાચસ્તે શ્રુતયોઽખિલાઃ ॥ ૩.૧૩.૧૦॥

ક્રીડા તે લોકરચના સખા તે ચિન્મયઃ શિવઃ ।
આહારસ્તે સદાનન્દો વાસસ્તે હૃદયે સતામ્ ॥ ૩.૧૩.૧૧॥

દૃશ્યાદૃશ્યસ્વરૂપાણિ રૂપાણિ ભુવનાનિ તે ।
શિરોરુહા ઘનાસ્તે તુ તારકાઃ કુસુમાનિ તે ॥ ૩.૧૩.૧૨॥

ધર્માદ્યા બાહવસ્તે સ્યુરધર્માદ્યાયુધાનિ તે ।
યમાશ્ચ નિયમાશ્ચૈવ કરપાદરુહાસ્તથા ॥ ૩.૧૩.૧૩॥

સ્તનૌ સ્વાહાસ્વધાઽઽકરૌ લોકોજ્જીવનકારકૌ ।
પ્રાણાયામસ્તુ તે નાસા રસના તે સરસ્વતી ॥ ૩.૧૩.૧૪॥

પ્રત્યાહારસ્ત્વિન્દ્રિયાણિ ધ્યાનં તે ધીસ્તુ સત્તમા ।
મનસ્તે ધારણાશક્તિર્હૃદયં તે સમાધિકઃ ॥ ૩.૧૩.૧૫॥

મહીરુહાસ્તેઽઙ્ગરુહાઃ પ્રભાતં વસનં તવ ।
ભૂતં ભવ્યં ભવિષ્યચ્ચ નિત્યં ચ તવ વિગ્રહઃ ॥ ૩.૧૩.૧૬॥

યજ્ઞરૂપા જગદ્ધાત્રી વિશ્વરૂપા ચ પાવની ।
આદૌ યા તુ દયાભૂતા સસર્જ નિખિલાઃ પ્રજાઃ ॥ ૩.૧૩.૧૭॥

હૃદયસ્થાપિ લોકાનામદૃશ્યા મોહનાત્મિકા ॥ ૩.૧૩.૧૮॥

નામરૂપવિભાગં ચ યા કરોતિ સ્વલીલયા ।
તાન્યધિષ્ઠાય તિષ્ઠન્તી તેષ્વસક્તાર્થકામદા ।
નમસ્તસ્યૈ મહાદેવ્યૈ સર્વશક્ત્યૈ નમોનમઃ ॥ ૩.૧૩.૧૯॥

યદાજ્ઞયા પ્રવર્તન્તે વહ્નિસૂર્યેન્દુમારુતાઃ ।
પૃથિવ્યાદીનિ ભૂતાનિ તસ્યૈ દેવ્યૈ નમોનમઃ ॥ ૩.૧૩.૨૦॥

યા સસર્જાદિધાતારં સર્ગાદાવાદિભૂરિદમ્ ।
દધાર સ્વયમેવૈકા તસ્યૈ દેવ્યૈ નમોનમઃ ॥ ૩.૧૩.૨૧॥

યથા ધૃતા તુ ધરણી યયાઽઽકાશમમેયયા ।
યસ્યામુદેતિ સવિતા તસ્યૈ દેવ્યૈ નમોનમઃ ॥ ૩.૧૩.૨૨॥

યત્રોદેતિ જગત્કૃત્સ્નં યત્ર તિષ્ઠતિ નિર્ભરમ્ ।
યત્રાન્તમેતિ કાલે તુ તસ્યૈ દેવ્યૈ નમોનમઃ ॥ ૩.૧૩.૨૩॥

નમોનમસ્તે રજસે ભવાયૈ નમોનમઃ સાત્ત્વિકસંસ્થિતાયૈ ।
નમોનમસ્તે તમસે હરાયૈ નમોનમો નિર્ગુણતઃ શિવાયૈ ॥ ૩.૧૩.૨૪॥

નમોનમસ્તે જગદેકમાત્રે નમોનમસ્તે જગદેકપિત્રે ।
નમોનમસ્તેઽખિલરૂપતન્ત્રે નમોનમસ્તેઽખિલયન્ત્રરૂપે ॥ ૩.૧૩.૨૫॥

નમોનમો લોકગુરુપ્રધાને નમોનમસ્તેઽખિલવાગ્વિભૂત્યૈ ।
નમોઽસ્તુ લક્ષ્મ્યૈ જગદેકતુષ્ટ્યૈ નમોનમઃ શાંભવિ સર્વશક્ત્યૈ ॥ ૩.૧૩.૨૬॥

અનાદિમધ્યાન્તમપાઞ્ચભૌતિકં હ્યવાઙ્મનોગમ્યમતર્ક્યવૈભવમ્ ।
અરૂપમદ્વન્દ્વમદૃષ્ટગોચરં પ્રભાવમગ્ર્યં કથમંબ વર્ણયે ॥ ૩.૧૩.૨૭॥

પ્રસીદ વિશ્વેશ્વરિ વિશ્વવન્દિતે પ્રસીદ વિદ્યેશ્વરિ વેદરૂપિણિ ।
પ્રસીદ માયામયિ મન્ત્રવિગ્રહે પ્રસીદ સર્વેશ્વરિ સર્વરૂપિણિ ॥ ૩.૧૩.૨૮॥

ઇતિ સ્તુત્વા મહાદેવીં દેવાઃ સર્વે સવાસવાઃ ।

ભૂયો ભૂયો નમસ્કૃત્ય શરણં જગ્મુરઞ્જસા ॥ ૩.૧૩.૨૯॥

તતઃ પ્રસન્ના સા દેવી પ્રણતં વીક્ષ્ય વાસવમ્ ।
વરેણ ચ્છન્દયામાસ વરદાખિલદેહિનામ્ ॥ ૩.૧૩.૩૦॥

ઇન્દ્ર ઉવાચ
યદિ તુષ્ટાસિ કલ્યાણિ વરં દૈત્યેન્દ્રપીડિતાઃ ।
દુર્ધરં જીવિતં દેહિ ત્વાં ગતાઃ શરણાર્થિનઃ ॥ ૩.૧૩.૩૧॥

શ્રીદેવ્યુવાચ
અહમેવ વિનિર્જિત્ય ભણ્ડં દૈત્યકુલોદ્ભવમ્ ।
અચિરાત્તવ દાસ્યામિ ત્રૈલોક્યં સચરાચરમ્ ॥ ૩.૧૩.૩૨॥

નિર્ભયા મુદિતાઃ સન્તુ સર્વે દેવગણાસ્તથા ।
યે સ્તોષ્યન્તિ ચ માં ભક્ત્યા સ્તવેનાનેન માનવાઃ ॥ ૩.૧૩.૩૩॥

ભાજનં તે ભવિષ્યન્તિ ધર્મશ્રીયશસાં સદા ।
વિદ્યાવિનયસમ્પન્ના નીરોગા દીર્ઘજીવિનઃ ॥ ૩.૧૩.૩૪॥

પુત્રમિત્રકલત્રાઢ્યા ભવન્તુ મદનુગ્રહાત્ ।
ઇતિ લબ્ધવરા દેવા દેવેન્દ્રોઽપિ મહાબલઃ ॥ ૩.૧૩.૩૫॥

આમોદં પરમં જગ્મુસ્તાં વિલોક્ય મુહુર્મુહુઃ ॥ ૩.૧૩.૩૬॥

ઇતિ શ્રીબ્રહ્માણ્ડમહાપુરાણે ઉત્તરભાગે હયગ્રીવાગસ્ત્યસંવાદે લલિતોપાખ્યાને
લલિતાસ્તવરાજો નામ ત્રયોદશોઽધ્યાયઃ ॥

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

.. lalitA stavarAjaH from brahmANDamahApurANa ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*